१६०
पर्णशरविधान
पर्णदाह विधि दशदान
पञ्चधेनु दान

परीदलस्यसराजाम

कासाछेपू पाप कन्ति —

पंलासहल — ३६० मृत्तिका —

जनावालनंक्या १ मोतिख २

कैरव ---- २ घेल —

खयमुग - ख - २ पलेस्वां —

भिंपू -- ख - २ भातीख २

धाले·केरा·लाह

ह ------- २

श्रृंगिकाअयाउ·ना १

तुंवीफल तुंवा १

मनशील ---

का वीर्येपारदंपाधा

आउली —

हरिताल —

ली·सावो —

उसियाबु —

गुफायासकुरलींमानिःन्त

ये·लोम्हि दुर्वा·वालाविल

खल नालपत्र हामकं

रवगुवच·सतपत्र·तछोर्चु·
उत्तीरकर्जुरफलछोलरा·
पिपी·उशीर·धौ·दुकुलपा
नवस्त्र·पंचरत्न·रवा·कुंकु
म·करवीरमाला·तोयूका
प·कस्तुर·श्रीखराट·कर्पूर
पिता·ताय·तुलशी·वला
याहेगू·नस्वा·ह्मयापौ·
अरूदानं·दशदानं·अ
न्न·जलदानं॥ ॥

१श्रीगणेशायनमः॥अथपर्णशरविधानंलिख्यते॥विदेशमरणेज्ञानालभेदाहप्रकीर्त्तितः॥
अस्थ्नामलाभेपर्णानांवृंतैर्दाहः॥प्रकल्पयेत्॥तदभावेकुशैर्वापितितोदाहोयथाविधिः
॥ ॥विदेशमरणेस्थीनिआहृत्याभ्यज्यसर्पिषा॥दाहयेद्बर्हिषाछाद्यपात्रन्यासा
दिपूर्वकं॥ ॥अस्थामलाभेपर्णानिशाकलान्युक्तयावृत्ता॥दाहयेदस्थिसंख्या
नितत:प्रभृतिसूतकं॥ ॥अस्थामलाभेपर्णानिपलाशान्युक्तयाश्रवा॥दाहयेद
स्थिसंख्यानिततःप्रभृतिसूतकमितिछन्दोगपरिशिष्टे॥ ॥हेमाद्रौषट्त्रिंशन्मते॥
कुर्याद्दर्भमयंप्रेतंकृत्वात्रिशतषष्टिभिः॥पलाशोभिःशमिद्भिर्वासंख्याचैव

प्रकीर्त्तिताः॥ ॥मध्यमान्ते पृष्ठपार्श्वे दद्याशिरस्यत्रीत्पर्द्धग्रीवायां
तु दशैव तु॥ बाह्वोश्चैकशतं दद्याद्दश चैवाङ्गुलीषु च॥ उरसि त्रिंशतं दद्या
द्विंशा त्रिजठरे तथा॥ पादशार्द्धं वृषणयोरेकार्द्धं शिश्नस्य तु॥ ऊर्वोश्चैक
शतं दद्यात्त्रिंशतं जंघयोः॥ पादाङ्गुलीषु दश क्रमेनान्त्रेन तस्य कल्पनं॥ ॥
मस्तके नारिकेलं तु अलाम्बुं नालुकेन तथा॥ पंचरत्नं मुखे न्यस्य जि
ह्वायां कदलीफलं॥ वक्ष पोस्तकपर्दीवौ नासिकायां तु नालुकं॥

कर्णयोः शुक्तिकाद्वंद्वं केशे वत्सप्ररोहकाः॥ नालकं कमलानां तु अन्त्रस्था
ने विनिक्षिपेत्॥ मृत्तिकां तु वसाधानु हरितालकगन्धकैः॥ शुक्ले तु पारदं द
द्यात् पुरीषे पित्तलं तथा॥ सर्षपं तिलपिष्टं तु मांसे स्याद्यवपिष्टकं॥ मधु
स्यात् लोहितस्थाने त्वक्च च स्थाने मृगत्वच॥ स्तनयोर्गुञ्जके देया नाशायां शत
पत्रकं॥ कमलं नाभिदेशे स्याद् वृन्ताकं वृषणाश्रिते॥ लिंगं च रक्तमूलं तु परि
धाने दुकूलं॥ गोमूत्रं गोमयं गंधं सर्वौषध्यादि सर्वतः॥ घृतेनाभ्यां प्रदेयं स्या
त्कौपीने च त्रपुः स्मृतः॥ मौक्तिके चूचुके देया कुंकुमेन विलेपनं॥ प्रवालावे

छुयोर्दद्याद्दाडिम्बं दन्तपङ्क्तिषु ॥ मनःशिलां च हृदये नाडीषु स्वेन मूत्रकं
॥ मूत्रे गोमूत्रकं दद्याद्दूर्वां लोम्नि प्रदापयेत् ॥ खलं सन्धिषु वै दद्यात्पूगी
गुल्फ द्वयोर्न्यसेत् ॥ पादौ द्वावुत्तनी दैया पिप्पली पित्तधातुषु ॥ उशीरं वा
तस्य स्थाने दधि दद्यात्कफस्थले ॥ ताम्बूलं तु मुखे दद्यात्पुष्पमालां गले न्यसेत् ॥ पु
मुखे शिम्बिबीजानि घृतेनाभ्यञ्जयेत्ततः ॥ तेजस्याग्निं प्रदातव्यानंतो दाहो य
थाविधिः ॥ ॥ अथ पलाशपत्राणां संख्याक्रमेणान्यासः ॥ ॥ ॥ शतेनाशि
नोपरि कुशपुत्तलं निधाय ॥ ॐ अक्रूरकर्म्मकर्म्मकृतः सह ब्राह्मामयां भुवा ॥ दं

वर्षद्विपर्वितं=३ =बालाग्नि·स्वस्तिपद=३

विभ्यःकर्म्मकृत्वासत्यंपूतस्यभुवः॥ ॥चत्वारिंशमस्तके॥४०॥ॐशिरोमेश्रीर्यशो
मुखन्त्विषिःकेशाश्चश्मश्रूणि॥राजामेप्राणोऽअमृतंऽसम्म्राट्चक्षुर्विराट्श्रोत्र
म्॥१॥ ॥ग्रीवायांदशकं॥१०॥ॐनीलग्रीवाःशितिकण्ठादिवंऽरुद्राऽउपश्रिताः
॥तेषांऽसहस्रयोजनेवधन्वानितन्मसि॥ ॥बाहुयुग्मेशतम्॥१०००॥ॐबा
हूमेबलमिन्द्रियंऽहस्तौमेकर्म्मवीर्यम्॥आत्माक्षत्रमुरोमम॥ ॥हस्ताङ्गुलीषु
दशकं॥१०॥ॐअसंख्याताःसहस्राणियेरुद्राऽअधिभूम्याम्॥तेषांऽसहस्रयो
जनेवधन्वानितन्मसि॥ ॥जठरेविंशतिः२०॥ॐउदुत्यंजातवेदसन्देवंवह

न्तिकेतवः॥ दृशेविश्वायसूर्य्यंꣳ स्वाहा॥ ॥कक्षयोस्त्रिंशत ३०॥ ॐ कयानश्चित्रऽ
आभुवदूतीसदावृधःसखा॥ कयाशचिष्ठयावृता॥ ॥उरस्युमेशतकम॥१००
॥ॐ इमन्देवाऽअसपत्नꣳ सुवध्वम्महतेक्षत्त्रायमहतेज्यैष्ठ्यायमहतेजानरा
ज्यायेन्द्रस्येन्द्रियाय॥ इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीरा
जासोमोस्माकंब्राह्मणानांꣳ राजा॥ ॥जानुजंघयोस्त्रिंशत ३०॥ ॐ यज्जाग्र
तोदूरमुदैतिदैवन्तदुसुप्तस्य॥ तथैवैति दूरङ्गमंज्योतिषांज्योतिरेकन्तन्मेमनः
शिवसंकल्पमस्तु॥ ॥पादांगुलिषुदशकं १०॥ ॐ यमायत्वामखायत्वासू

र्कस्यत्वातपसो॥देवस्त्वासवितामध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि
अर्चिरसिशोचिरसितपोसि॥ ॥मुखेषट्६॥ॐचत्वारिशृङ्गात्रयोऽ
अस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य॥त्रिधाबद्धोवृषभोरोरवीतिम
होदेवोमर्त्याꣳ२ऽआविवेश॥ ॥लिङ्गेचत्वारि४॥ॐएवेदिन्द्रंवृष
णावज्रबाहुंवसिष्ठासोऽअभ्यर्चन्त्यर्कैः॥सनस्तुतोवीरवद्धातु
गोमद्यूयंपातस्वस्तिभिःसदानः॥ ॥एवंपर्णानिनिधाय॥ ॥शिर
सिनारिकेलं॥ॐशिरोमेश्रीर्यशोमुखंत्विषिःकेशाश्चश्मश्रूणि

॥राजामेप्राणोऽअमृतꣳसम्राट्चक्षुर्विराट्श्रोत्रम्॥ ॥कपालेतुम्बीफ
लम्॥ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामना
धृष्टन्देवयजनमसि॥ ॥वक्षसिकपर्दीवो॥ॐआनोनियुद्भिःशति
नीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्॥वायोऽअस्मिन्सवनेमाद
यस्वयूयंपातस्वस्तिभिःसदानः॥ ॥ललनमारल्लयोर्गुंजाद्वयं॥ॐनमोवृक्षे
भ्योहरिकेशेभ्यःपशूनांपतयेनमोनमःशष्पिञ्जरायत्विषीमतेपथीनांपतये
नमोनमोहरिकेशायोपवीतिनेपुष्टानांपतयेनमोनमः॥ ॥ओष्ठयोःप्रवाल

लद्दयं॥ ॐ पवमानः शोऽ अद्यनः पवित्रेण विचर्षिणि॥ यः पोता स पुनातु
मा॥ ॥ दन्तपंक्तिषु डाडिम्बवीजं॥ ॐ शं दन्तद्विरवका न्दन्तमूलेम्मृदन्तस्वैहो
गान्द ॐ स्त्रोत्व्या ॐ सरस्वत्याऽ अग्रजिह्वं शिष्काया ऽ उत्सा दमक्रुन्दे ननालु
घाज ६० हनुन्नामपऽ आस्येन वृषणंमाराद्यान्नामादिन्या श्मश्रुभिः पन्थानमूर्ध्वां घ्रा
ष्टिःभुनर्कुनीनकाद्या ॐ शुक्राय स्वाहा कृष्णाय स्वाहा पार्श्वाणि पक्ष्माणि पवार्श्चोऽ
इक्षवो वार्श्वाणि पक्ष्माणि पार्श्वाऽ इक्षवः॥ ॥ जिह्वायां कदलीफलम्॥ ॐ श्री
श्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णन्निषा
ण मुम्मऽ इषाण सर्वलोकं मऽ इषाण॥ ॥ कर्णयोः शुक्तिका द्वयं॥ ॐ भ

श्री [illegible]

द्रं कर्णेभिः श्रणुयाम देवा भद्रम्पश्यमाक्षभिर्य्यजत्राः॥ स्थिरैरङ्गैस्तुष्टु
वाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ ॥रुधिरस्थाने मधु॥ ॐ म
धुवाता ऽ ऋतायते मधुक्षरन्ति सिन्धवः॥ माध्वीर्न्नः सन्त्वोषधीः॥ ॐ मधु
नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ मधु द्यौरस्तु नः पिता॥ ॐ मधु
मान्नो वनस्पतिर्म्मधुमाꣳ अस्तु सूर्य्यः॥ माध्वीर्गावो भवन्तु नः॥ ॥वसा
स्थाने मन्त्रिका॥ ॐ कयानश्चित्र ऽ आभुवदूती सदावृधः सखा॥ कया श
चिष्ठया वृता॥ ॥हृदये मनःशिला॥ ॐ मानस्तोके तनये मान ऽ आयुषि

मानोगोषुमानोऽअश्वेषुरीरिषः॥मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःस
दमित्वाहवामहे॥ ॥स्तनचूचुकयोर्मौक्तिकवर्णं॥ॐइमꣳस्तनमूर्ज्जस्व
न्तंधयापाम्प्रपीनमग्नेसरिरस्यमध्ये॥उत्सञ्जुषस्वमधुमन्तमर्वन्त्समुद्रियꣳ
सदनमाविशस्व॥ ॥नाभिस्थानेघृतं॥ॐघृतंघृतपावानःपिबतवसांवसा
पावानः॥पिबतान्तरिक्षस्यहविरसिस्वाहा॥दिशःप्रदिशऽआदिशोविदि
शऽउद्दिशोदिग्भ्यःस्वाहा॥ ॥आन्त्रस्थानेकमलनालानि॥ॐआन्त्रा
णिस्थालीर्मधुपिन्वमानागुदाःपात्राणिसुदुघानधेनुः॥श्येनस्यपत्रन्नप्ली

ह्रशव्वीभिरासन्दीनाम्मस्वदन्नेमाता॥ ॥नाडीषुम्चेतसूत्रं॥ ॐ पयः पृथि
व्व्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः॥पयस्वतीः प्प्रदिशः सं
न्तुमह्यं॥ ॥वीर्य्येपादरं॥ ॐ व्वयᳪसोम व्व्रतेतवमनस्तनूषु विब्भ्रतः॥
प्रजावन्तः सचेमहि॥ ॥लिङ्गस्थानेरक्तमूलं॥ गं अनंगा॥ ॐ इन्द्रा
ग्नीऽआगतᳪसुतङ्गीर्भिन्नभोवरेण्यम्॥ अस्यपातन्धियेषिता॥ ॥धातुस्था
नेहरितालम्॥ ॐ ब्रह्मयज्ञानंप्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः॥॥स
बुध्न्याऽउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥ ॥आत्मस्थाने

६ ३ँ।ऽऽ।ऽ-।ऽ

त्ऱ्नाकपृष्ठं॥ ॐ नाभिर्मेचित्तंविज्ञानंपायुर्मेपचितिर्भसत्॥ आनन्दनन्दा
वाण्डौमेभगःसौभाग्यंपसः॥ जङ्घाभ्यांपद्भ्यांधर्मोस्मिविशिराजाप्रति
ष्ठितः॥ ॥पुरीषेपित्तलं॥ ॐ हंसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषद
तिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋ
तम्बृहत्॥ ॥मुखेगोभुजं॥ ॐ धन्वनागाधन्वनाजिञ्जयेमधन्वनाँ॒सर्वाःप्रदि
शोजयेम॥ ॥केशेषुवज्रप्ररोहकाश्यककेशाखा॥ ॐ कयानश्चित्रऽआभुवदू
तीसदावृधःसखा॥ कयाशचिष्ठयावृता॥ ॥दुर्गालोमानि॥ ॐ नदक्षिणानाभि

३ँ तीव्राःसमदोजयेम॥ धनुःशत्रोरपकामङ्कृणोति

षजाहृद्भावर्त्तनीसरस्वतीव्वयतिपेशोऽअन्तरम्॥अस्थिमज्जानम्मासरैःकारोत
रेणदधतोगवान्त्वचि॥ ॥लोमनिधूर्वा॥ॐलोमानिप्प्रयतिर्म्ममत्वङ्मऽआन
तिरागतिः॥माँसम्मऽउपनतिर्व्वस्वस्थिम्मज्जामऽआनतिः॥ ॥प्रमुखेविप्र
निर्वीजं॥ॐवयᳫँसोमव्व्रतेतवमनस्तनूषुविभ्रतः॥प्रजावन्तःसचेमहि
॥ ॥सन्धौरक्तं॥ॐपुनन्तुमादेवजनाःपुनन्तुमनसाधियः॥पुनन्तुविश्वा
भूतानिजातवेदःपुनीहिमा॥ ॥नासायांतालपत्रं॥ॐमुखᳫँसदस्यशिर
इत्सतेनजिह्वापवित्रमश्विनासन्सरस्वती॥चप्यन्नपायुर्भिषगस्यवालोवस्ति

न्नश्रेयोहरसारस्वती॥ ॥नाशारन्ध्रे श्वेतपद्मम्॥ ॐ अविर्न्नमेषोनसिवीर्य्याय
प्राणस्यपन्थाऽअमृतोग्रहाभ्याम्॥ सरस्वत्युपवाकैर्व्यानन्नस्यानिवर्हिर्व्वद
रैर्ज्जजानः॥ ॥नाभीकमलं॥ ॐ नाभिर्म्मेचित्तं विज्ञानंम्पायुर्म्मेपचितिर्ब्भसत्॥ आ
नन्दनन्दावाण्डौमेभगः सौभाग्यंम्पसः॥ जङ्घाभ्यांम्पद्भ्यां धर्म्मोस्मिविशिरा
जाप्रतिष्ठितः॥ ॥सन्धिपुटिपिङ्गु॥ ॐ सन्धयेजारङ्गेहायोपपतिमार्त्यैप
रिवित्तं निर्ऋत्यैपरिविविदानमराध्याऽएदिधिषुःपतिन्निष्कृत्यैपेसस्का
रीं संज्ञानायस्मरकारीम्प्रकामोद्यायोपसदंवर्णायानुरुधंबलायोपदा

मू॥ ॥मांसेयवपिष्टं॥ ॐ माꣳ सम्म ऽ उपनत्रिवस्त्वत्क्विमज्ज्ञाम ऽ आनति
॥ ॥मुखकयोः पूगीफलं॥ ॐ याः फलिनीर्या ऽ अफला ऽ अपुष्पायाश्च पु
ष्पिणीः॥ बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वꣳहसः॥ ॥पादयोउन्नं॥ ॐ पुरु
दस्मो विषुरूप ऽ इन्दुरन्तर्महिमानमानंजधीराः॥ एकपदी द्विपदीं चतु
ष्पदीमष्टापदीम्भुवनानुप्रथन्ताꣳ स्वाहा॥ ॥पित्तस्थाने पिप्पली॥ ॐ शुन
ꣳ शुफाला विकृषन्तु भूमिꣳ शुनं कीनाशा ऽ अभियन्तु वाहैः॥ शुनासीरा ह
विषा तोशमाना सुपिप्पला ऽ कर्त्तनास्मे॥ ॥वातस्थाने उशीरं॥ ॐ वातप्र

रोना पानेना पानेननासिके ऽउपयाममधरेणोष्ठेनसदुत्तरेणाप्रकाशेनान्तरम
नूकाशेनबाह्यंनिवेष्यम्मूर्ध्नास्तनयित्नुन्निर्बाधेनाशनिम्मस्तिष्केणविद्यु
तङ्कनीनकाभ्याङ्कर्णाभ्यां ॐ श्रोत्रं ॐ श्रोत्राभ्याङ्कर्णौतेदनीमधरकण्ठेना
पः शुष्ककण्ठेनचित्तम्मन्याभिरदितिं ॐ शीर्ष्णानिर्ऋतिन्निर्जर्जल्पेनशीर्ष्णा
संक्रोशैः प्राणान्रेष्माणं ॐ स्तूपेन॥ ॥शीर्षस्थानेदधि॥ ॐ दधिक्राव्णोऽ
अकारिषञ्जिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणऽआयूंषि ॐ तारिषत्
॥ ॥परिधानेदुकूलं॥ ॐ युवासुवासाःपरिवीतआगात्सऽउश्रेयान्भवतिजा

यमानः॥ तन्धीरासः कवय ऽ उन्नयन्ति स्वाध्योमनसा देवयन्तः॥ ॥सुवर्णप
ञ्चरत्नानि॥ ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् दधद्रत्नानि दा
शुषे॥ ॥मुखेताम्बूलं॥ ॐ नमः पर्णाय च पर्णशदाय च नम ऽ उद्गुरमाणाय चा
भिघ्नते च नम ऽ आखिदते च प्रखिदते च नम ऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो
नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्के
भ्यो नम ऽ आनिर्हतेभ्यः॥ ॥कुंकुमादि विलेपयेत्॥ ॐ गन्धद्वारां दुराधर्षां
नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ ॥करवीरादि

पुष्पमालाम्॥ ॐयद्यशोप्सरसामिन्द्रश्चकारविपुलंपृथुतेनसंग्रथिताःसुमनसआ
बध्नामियशोमयि॥ ॥स्वेनवस्त्रेणावेष्टयेत्॥ ॐवसोःपवित्रमसिशतधारंव
सोःपवित्रमसिसहस्रधारं॥ देवस्त्वासवितापुनातुवसोःपवित्रेणशतधारे
णसुप्वाकामधुक्षः॥ ॥एवंप्रेतस्यशरीरंविधाय॥ यक्षकर्दमैरधिवासयेत्
॥ ॥ॐसर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि॥ नैनमूर्ध्वंनतिर्यञ्चंनमध्येपरि
जग्रभत्॥ ॥यक्षकर्दमोयथास्कान्दे॥ कस्तूरिकायाद्वौभागौद्वौभागौकुं
कुमस्यच॥ चन्दनस्यत्रयोभागाःशशिनस्त्वेकएवहि॥ यक्षकर्दमइत्येषः
सर्वदेवप्रियोमतःइति॥ ॥ततःपुरुषसूक्तन्यासः॥ वामभुजे॥ ॐसहस्रशी

र्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्
॥ ॥ **दक्षभुजे** ॥ ॐ पुरुष एवेदꣳ सर्व्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो
यदन्नेनातिरोहति ॥ ॥ **वामपादे** ॥ ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः ॥
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ॥ **दक्षिणपादे** ॥ ॐ त्रिपादूर्ध्व
उदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ॥
वामजानौ ॥ ॐ ततो विराडजायत विराजो अधि पूरुषः ॥ स जातो अत्यरिच्य
त पश्चाद्भूमिमथो पुरः ॥ ॥ **दक्षजानौ** ॥ ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृष

दाज्यम्॥ पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्च ये॥ ॥वामकर्णे॥ ॐ तस्मा
द्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे॥ छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मा
दजायत॥ ॥दक्षिणकर्णे॥ ॐ तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः॥ तेन देवाऽ
अयजन्त साध्याऽऋषयश्च ये॥ ॥उदरे॥ ॐ तस्मादश्वाऽअजायन्त ये के चोभ
यादतः॥ गावो ह जज्ञिरे तस्मात्तस्माज्जातमग्रतः॥ तेन देवाऽअयजन्त साध्याऽ
ऋषयश्च ये॥ ॥हृदये॥ ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्॥ मुखं
किमस्यासीत्किं बाहू किमूरू पादाऽउच्येते॥ ॥स्कन्धयोः॥ ॐ ब्राह्मणोस्य मु
खमासीद्बाहू राजन्यः कृतः॥ ऊरू तदस्य यद्वैश्यः पद्भ्यांꣳ शूद्रोऽअजायत॥

वामवाहौ॥ॐ चन्द्रमा मनसोजातश्चक्षोः सूर्य्यो ऽ अजायत॥श्रोत्राद्वायुश्चप्रा
णश्च मुखादग्निरजायत॥ ॥दक्षवाहौ॥ॐ नाभ्या ऽ आसीदन्तरिक्षꣳ शीर्ष्णो
द्यौः समवर्त्तत॥पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथालोकाँ२ꣳ अकल्पयन्॥ ॥मुखे
॥ॐ यत्पुरुषेणाहविषा देवायज्ञमतन्वत॥वसन्तोस्याशीदाज्यङ्ग्रीष्म ऽ इध्मः श
रद्धविः॥ ॥नेत्रयोः॥ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः॥देवाय
द्यज्ञंतन्वाना ऽ अवध्नन्पुरुषम्पशुम्॥ ॥मूर्द्ध्नि॥ॐ यज्ञेनयज्ञमयजन्तदे
वास्तानिधर्म्माणिप्रथमान्यासन्॥तेहनाकम्महिमानः सचन्तयत्रपूर्वेसाध्याःस
न्ति देवाः॥ ॥नमः सकलीकरणम्॥ॐ शिरोमेश्रीर्य्यशोमुखन्त्विषिः केशाश्च

श्मश्रूणि॥राजामेप्राणोऽअमृत६०सम्राट्चक्षुर्विराट्श्रोत्रम॥ॐजिह्वामेभद्रं
वाङ्महोमनोमन्युः॥मोदाःप्रमोदाऽअङ्गुलिरङ्गानिमित्रम्मेसहः॥ॐबाहू
मेबलमिन्द्रिय६०हस्तौमेकर्मवीर्यम॥आत्माक्षत्रमुरोमम॥ॐपृष्ठीर्मे
राष्ट्रमुदरम६०सौग्रीवाश्चश्रोणी॥ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्व
तः॥ॐनाभिर्मेचित्तंविज्ञानम्पायुर्मेपचितिर्भसत॥आनन्दनन्दावाण्डौमेभगः
सौभाग्यम्पसः॥जङ्घाभ्याम्पद्भ्यान्धर्मोस्मिविशिराजाप्रतिष्ठितः॥ॐप्र
तिक्षत्रेप्रतितिष्ठामिराष्ट्रेप्रत्यश्वेषुप्रतितिष्ठामिगोषु॥प्रत्यङ्गेषुप्रतितिष्ठा
म्यात्मन्प्राणेषुप्रतितिष्ठामिपुष्टेप्रतिद्यावापृथिव्योःप्रतितिष्ठामि

यज्ञे॥ ॐ वाचन्ते शुन्धामि प्राणान्ते शुन्धामि श्रोत्रन्ते शुन्धामि नाभिन्ते शुन्धामि
मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्रांस्ते शुन्धामि॥ ॥शुद्धजलेन प्रोक्ष
णम्॥ ॐ सीसेन तन्त्रं मनसा मनीषिण ऽ ऊर्णासूत्रेण कवयो वयन्ति॥ अश्वि
नायज्ञꣳ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन्॥ ॐ मनस्त ऽ
आप्यायतां वाक्त ऽ आप्यायतां प्राणस्त ऽ आप्यायतां चक्षुस्त ऽ आप्यायतां
श्रोत्रन्त ऽ आप्यायताम्। यत्ते क्रूरं यदास्थितं तत्त ऽ आप्यायतां निष्ट्यायतां तत्ते
शुध्यतु शमहोभ्यः॥ ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः॥ ॐ आदित्यगर्भं
पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम्। परिवृङ्धि हरसा माभिमꣳस्थाः॥

नायुषद्भूरा॰हिंसीयमानः॥ ॥आज्यनिर्दीपंयोजयित्वानाभौधारयेत्॥ ॐ
तेजः पश्य ॐ हविरिन्द्रियावत्परिक्षतापयसासारघम्मधु॥ अश्विभ्यांदु
ग्धम्भिषजासरस्वत्या॥ सुतासुत्वांसमधतः सोमऽइन्दुः॥ ॐ हं॰सः शुचिषद्व
सुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसद्
ब्जागोजाऽऋतजाऽअद्रिजाऋतम्बृहत्॥ ॥प्रतिष्ठा॥ ॐ मनोजूतिर्जु
षतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञ॰ समिमन्दधा
तु॥ विश्वेदेवासऽइहमादयन्तामों३ प्रतिष्ठ॥ ॥गर्भाधानं॥ ॐ य
स्येनेअङ्गिरोगर्भोयस्मैयोनिहिरण्मयी॥ अङ्गान्यह्रुताजस्यतम्मा

जी
त्रासमग्राम ॐ स्वाहा॥ ॥सीमन्तोनयनं॥ ॐ मा हिंसीर्मा पुत्रादा कुर्न्नमस्त्वेऽआ
नानानर्व्वाप्रेहि॥ घृतस्य कुल्या ऽ उप ऽ ऋतस्य पथ्या ऽ अनु॥ ॥जातकर्म्म॥
ॐ अस्म्यात्त्वाजातत्त्वपुराकिश्चैनेवयं आवभूवनानि विश्वा॥ प्रजापतिः प्रजया स ९०
रराणा ह्वी॥ त्र्युषे ॐ षिमचत्तेसषोडशी॥ ॥सूर्यदर्शनं॥ ॐ तच्चक्षुर्देवहितं
पुरस्ताच्छुक्रमुच्चरत्॥ पश्येम शरदः शतं जीवेम शरदः शतं ९० शृणुया
म शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः
शतात्॥ ॥अन्नप्राशनं॥ ॐ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिनः॥ प्रप्र
दातारं तारिष ऽ ऊर्ज्जन्नो धेहि द्विपदे चतुष्पदे॥ ॥क्षौरं॥ ॐ शिवो नामासि स्व

धितिस्ते पिता नमस्ते ऽ अस्तु मामा हिंᳬसीः॥ निवर्त्तयाम्यायुषेन्नाद्याय प्रजनना
यरायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय॥ ॥कर्णवेध॥ ॐ भद्रं कर्णेभिः शृ
णुयाम देवा भद्रम्पश्येमाक्षभिर्य्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्य
शेम हि देवहितं यदायुः॥ ॥वस्त्रधनं॥ ॐ ब्रह्मयज्ञानं प्रथमम्पुरस्ताद्वि
सीमतः सुरुचो वेन ऽ आवः॥ आबुध्न्या ऽ उपमा ऽ अस्य विष्ठाः सतश्च योनिमस
तश्च विवः॥ ॥नपुंवोपनं॥ ॐ येनेन्द्राय बृहस्पतिर्व्वासो पर्य्यदधादमृतं॥ तेन
त्वां प्रतिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्च्चसे॥ ॥यज्ञोपवीतं॥ ॐ य
ज्ञोपवीतम्परमं पवित्रं प्रजापतेर्य्यः सहजं पुरस्तात्॥ आयुष्यमग्र्यं प्रतिमुञ्च

शुभ्रंयज्ञोपवीतंबलमस्तुतेजः॥ ॥समावर्त्तनं॥ॐ आयङ्गौःपृश्निर्

क्रमीदशदन्मातरन्पुरः॥पितरञ्चप्रयन्त्स्वः॥ ॥विवाह॥ॐ ध्रुवासिध्रु

वोयंयजमानोस्मिन्नायतनेप्रजयापशुभिर्भूयात॥घृतेनद्यावापृथिवी

पूर्य्येथामिन्द्रस्यछदिरसिविश्वजनस्यछाया॥ ॥चतुर्थी॥ॐ प्रजापतिश्च

रतिगर्ब्भेऽअन्तरजायमानोबहुधाविजायते॥तस्ययोनिम्परिपश्यन्तिधीरास्त

स्मिन्हतस्थुर्भुवनानिविश्वा॥ ॥जीवावाहनं॥ॐ आप्यायस्वसमेतुतेविश्व

तःसोमवृष्ण्यम्॥भवावाजस्यसङ्गथे॥ॐ सन्तेपयाᳲसिसमुयन्तुवाजाः

सवृष्ण्यान्यभिमातिषाहः आप्यायमानोऽअमृतायसोमदिविश्रवाᳲस्युत्तमा

घिष्वा॥ ॐ आप्यायस्वमदिन्तमसोमविश्वेभिरंशुभिः॥ भवानः सप्रथस्तमः
सखावृधे॥ ॐ आतेवत्सोमनोयमत्परमाच्चित्सधस्थात्॥ अग्नेत्वाङ्कामया
गिरा॥ ॐ तुभ्यन्ताऽअङ्गिरस्तमविश्वाः सुक्षितयः पृथक्॥ अग्नेकामायये
मिरे॥ ॐ अग्निःप्रियेषुधामसुकामोभूतस्यभव्यस्य॥ सम्राडेकोविराजति॥
॥ नतोष्टमहादानानिकुर्यात्॥ तिलालोहंहिरण्यपञ्चकार्पाससैलवणन्तथा॥ सप्त
धान्यंक्षितिर्गावीमहादानानिचाष्टवै॥ ॥ दशदानानिकुर्यात्॥ गोभूमितिलहि
रण्याज्यवासोधान्यगुडानिच॥ रौप्यंलवणमित्याहुर्दशदानानिपण्डितैः॥
घृतपात्रतिलपात्रदानम्॥ सर्वानिदानवाक्यानिअग्रेवक्ष्यन्ते॥ ॥

ततोविष्णवेसहिरण्यनारीकेलफलेनसहअर्घ्यंशंखेनदद्यात्॥ॐनमोजय
यदेवायजयमत्स्यरूपायच॥जयकामप्रदायैनिजयविष्णोनमोस्तुते॥ ॥
ततोविदेशगतंअवागतइतिभावयेत्॥ॐइमंजीवेभ्यःपरिधिन्दधामिमैषा
नुगादपरोअर्थमेतत्॥शतंजीवन्तुशरदःपुरूचीरन्तर्मृत्युंदधतांपर्व
तेन॥ ॥ततोग्निंशरीरेदीपमन्त्रीभूतेरोगोप्यंनिविभाव्य॥वैष्णवन
डीदर्शनादिकंकारयित्वाअसाध्यरोगमितिवैद्यमुखाच्छ्रुत्वा॥आतु
रस्थायांशारीरस्वास्थ्यभरांपठन्॥दक्षिणाशिरोगोमयोपलिप्तायांभूमौनि
धाय॥कण्ठेतुलसीमाला॥मुखेतुलसीपत्रं॥ललाटेगोपीचन्दनंगंगामृ

त्रिकादीनि दत्वा विष्टकस्मरणा पूर्ववत्कांवेदव श्राद्धं कृत्वा॥ ॥प्राक्शिर
धेनुं वैतरणीं॥ उत्क्रान्तिधेनुं च दत्वा॥ ॥आनाभिमात्रं जले नि
धाय। दीपनिष्ठन्नो प्राणमोक्षणम्॥ ॐ परं मृत्यो ऽ अनुपरेहि पन्थां
यस्ते ऽ अन्य ऽ इतरो देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः
प्रजां रीरिषो मोत वीरान्॥ ॥ततः शवस्नानादिकं स्वगृह्योक्तविधि
नाजदृपिराग्न्यन्दत्वादाहादिकं कृत्वा दशपिण्डादिकं दद्यात्॥ ॥र
वं पर्णनरं दग्धा त्रिरात्र अशुचिर्भवति॥ यदि तीर्थे कृते दाहे सद्यः शौ

वंविधीयते॥ ॥इतिपर्वादिहविधिः॥ ॰६०३॰॰॥वैष्णवश्राद्धंनाराय
णबलिविधानेतिरिक्तत्वाद्वनतिरिक्तं॥नारायणबलिविधानेपंचदैवतं॰
अत्रविष्णुरेकदैवतमिति॥अथहव्यचत्वारिंशद्भिस्तत्परान्नंकुर्यादितिवै
ष्णवश्राद्धं॥ ॥अथमहादानवाक्यं॥अथैतिलम्॥तिलाःपापहरानित्यंविष्णोर्दे
हसमुद्भवाः॥तिलदानेनसर्वंमेपापंनाशयकेशव॥ ॥अद्यअमुकस्यसकलपा
पप्रशमनश्रीकेशवप्रीत्यर्थंइदंतिलंसोमदैवतंयथानामगोत्रब्राह्मणायदातुमहमु
त्सृजे॥१॥लोहं॥यानिपापान्यनेकानिमयापापकृतानि [illegible] व॥लोह

रावे २

म

न्दानेनमेदेवतानिनश्यंतुशर्वदा॥ अनेकपापप्रशमनंयल्लोकभयनिवारणंत्व
सर्विंकरममप्रीतयेइदंलोहंभैरवदैवतं॥ २॥ ॥हिरण्यं॥ हिरण्यगर्भगर्भस्थंहे
मवीजंविभावसोः॥ अनन्तपुण्यफलदमतःशान्तिंप्रयच्छमे॥ अनन्तपुण्यफलप्रा
प्तिन्चसकलशान्तिकामःइदंहिरण्यंवह्निदैवतं॥ ३॥ ॥कर्पासं॥ त्वमेवावरणाय
स्मात्लोकानामिहसर्वदा॥ कर्पासस्यतुदानेनममौघध्वंसनोभव॥ सकलौघध्वंसन
सकलावरणप्राप्तिकामइदंकार्पासंकेतुदैवतं॥ ४॥ ॥लवणं॥ रसनांमधुरांश्रे
ष्ठंलवणंबलवर्द्धनं॥ ब्रह्मणानिर्मितंसाक्षाद्दतःशान्तिंप्रयच्छमे॥ सर्वाशिषश्रा
प्तिस्वर्गद्वारकपोत्पत्तिनकामइदंलवणंसमुद्रदैवतं॥ ५॥ ॥सप्तधान्यानि

यथा॥ धान्यं यवं च गोधूमं मुद्गा माषाः कुलत्थकाः। चनकाश्चेति विज्ञेयाः सप्त धा
न्यानि वै विदुः॥ ॥धान्यस्य॥ धान्यं करोति दातारमिह लोके परत्र च॥ तस्माद्धु
दीयते धान्यमतः शान्तिं प्रयच्छ मे॥ १॥ ऐहिकामुष्मिकशुभफलप्राप्त्यर्थं
धान्यं प्रजापतिदैवतं॥ १॥ यवान्॥ धान्यराजाश्च माङ्गल्या द्विजःप्रीतिका
यवाः। तस्मादेषां प्रदानेन ममास्त्वभिमतं फलम्॥ अभीष्टसिद्ध्यर्थं च सकल
धान्यदानफलप्राप्तिकाम यवं विष्णुदैवतं॥ २॥ गोधूमाः॥ यस्मादन्नमयो
जम्बूद्वीपे गोधूमसम्भवाः। गन्धर्वसौख्यधनदा अतः शान्तिं प्रयच्छ मे॥ अश्वगन्ध
र्वलोकप्राप्तिवसुधनीत्यकाम गोधूमं प्रजापतिदैवतं॥ ३॥ मुद्गाः॥ मुद्गबीज

निवेद्ययस्मात्प्रियाणिपरमेष्ठिनः॥ तस्माद्देवप्रदानेनप्रीतिःसिद्ध्यतुमेसदा॥ परमेष्ठीप्री
तिसर्वकामसिद्ध्यर्थंमुद्गान्नंप्रजापतिर्दैवतं॥ ४ ॥ माषाः॥ यस्मान्मधुवधेकालेवि
ष्णोर्देहसमुद्भवाः॥ पितृप्रीतिकरामाषाअतःशान्तिंप्रयच्छमे॥ पितृप्रीतिकामोमा
षान्नंप्रजापतिर्दैवतं॥ ५ ॥ कुलत्थकाः॥ अग्निवर्णोद्भवानामवलकीर्तिप्रवर्द्धनः॥
कुलत्थाःसर्वपापघ्नाअतःशान्तिंप्रयच्छमे॥ बलकीर्तिप्रवर्द्धनसकलपापनिवा
रणार्थकामःकुलत्थंप्रजापतिर्दैवतं॥ ६ ॥ चनकाः॥ पुरागोवर्द्धनोद्धारसमये
हरिभक्षिताः॥ चनकाःसर्वपापघ्नाअतःशान्तिंप्रयच्छमे॥ सर्वपापनिवारणार्थकामः

यनकान्वंप्रजापतिर्दैवतं॰॥७॥ ॥रत्नानिसप्तधान्यानि॥६॥ ॥पृथ्वी॥यथाभू
मिप्रदानस्यकलांनार्हन्तिषोडशीं॥दानान्यन्यानिमेशान्तिर्भूमिदानाद्भवंत्वि
ह॥सकलपापक्षयपूर्व्वकषट्षष्ठिसहस्रवर्षपरिमितस्वर्गवा सत्वशिव
पुरप्राप्तिकामइमांभूमिंविष्णुदैवतं॰॥ ॥गौः॥यालक्ष्मीसर्व्वभूतानांयाच
देहेव्यवस्थिता॥धेनुरूपेणसादेविममपापंव्यपोहतु॥सर्व्वपापक्षयत्वान्म
न्तरविष्णुलोकप्राप्तिकामइमांगांरुद्रदैवतं॰॥८॥प्रत्येकंदानप्रतिष्ठां

इषट्‌महादानानि॥ ॥अथदशदानानि॥ ॥घृतपात्रदानं॥संयोगाद्घृतमुत्पन्न
यस्माद्मृततेजसः॥तस्माद्घृतार्चिर्विश्वात्माप्रीयतामत्रशंकरः॥यस्मात्तेजोमयंब्रह्मघृ
तेतच्चव्यवस्थितम्॥घृतपात्रस्वरूपेण॥तस्मान्मांपातुसर्वदा॥सकलपातकनाशनपू
र्वकं॥संसारस्थयुक्तकिंकिणीजालमंडितार्कवर्णविमानकरणकेशांकरलोकग
मनत्वमसिद्धिविद्याधरार्चितविशिष्टपितृसहितविचरणकामइदंघृतपात्रंमहंतु
यदैवतं०॥ ॥तिलपात्र॥तिलाःपुण्याःपवित्राश्चसर्वकामकराःशुभाः॥शुक्लार
कास्तथाकृष्णाविष्णुगात्रसमुद्भवाः॥यानिकानिचपापानिब्रह्महत्यासमानिच

॥तिलापात्रप्रदानेनतानितरयन्तुमेसदा॥ब्रह्महत्यासमस्तकल्पपापप्रशमनन्चसर्वकामफल
प्राप्तिर्विष्णोःसायुज्यकामइदंतिलपात्रंसोमदैवतं०॥ ॥अन्नदानं॥अन्नंवैप्राणिनांप्रा
णाअन्नंवैपावनंपरम्॥अन्नाद्भवन्तिभूतानितस्मैअन्नात्मनेनमः॥अन्नदःपशुमा
न्पुत्रीधनवान्भोगवानपि॥प्राणवांश्चापिभवतिरूपवांश्चतथैवच॥अन्नंप्रजाप
तिःसाक्षादन्नंविष्णुःसदाशिवौ॥तस्मादन्नसमंदानंनभूतोनभविष्यति॥सर्वेषामे
वदानानामन्नदानपरंस्मृतम्॥सद्यप्रीतिकरंनित्यंबलबुद्धिविवर्द्धनम्॥नान्नदानस
मंपुण्यंत्रिषुलोकेषुविद्यते॥गर्भस्थाजायमानाश्चबालवृद्धाश्चमध्यमाः॥आहारम

मभिकांक्षन्ति देवदानवराक्षसाः ॥ यस्यान्नपानपुष्टांगं कुरुते धर्मसंचयम् ॥ अन्नः
प्रदातुस्तस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः ॥ अन्नान्नेकः स्मृतिः प्राणमन्नात्पुष्टिर्वपुः सुख
म् ॥ अन्नात्कुलीनानि वीर्यं च अन्नात्सत्वं च जायते ॥ अन्नाज्जीवन्ति भूतानि अन्नात्तुष्टिक
रं सदा ॥ अन्नात्कामश्च दर्पश्च अन्नात्सौख्यं च जायते ॥ अन्नं ब्रह्मक्षत्रं वापि सद्य एव वि
नाशनम् ॥ अन्नदानात्सौभाग्यं धर्मं कीर्तिश्च जायते ॥ अन्नं प्रजापतिः साक्षादन्नं विष्णु
सदाशिवौ ॥ तस्मादन्नप्रदानेन सर्वदानफलं लभेत् ॥ यावत्तण्डुलमेकैकं परिसंख्या
तु यावती ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ अन्नदः प्राणदश्चापि प्राणदश्चा

पिअन्नदः॥तस्मादन्नसमंदानंनभूतोनभविष्यति॥अन्नेप्रतिष्ठितादेवाअन्नमा
युष्करंपरम्॥तस्मादन्नप्रदानेनप्रीयतामेप्रजापतिः॥अद्येत्यादि० पशुपुत्र
धनप्राणारूपाद्यनेकभोगप्राप्तिपूर्वकोदरजनितव्याधिपीडादिसकलरोग
निवारणात्वायुरारोग्यैश्वर्य्यप्राप्तिनन्तुत्तरलरुलैकपरिसंख्यासमदिव्यवर्ष
सस्नावधिन्नत्रिवल्लोकनिवासकामइदमन्नंप्रजापतिदैवतं० ॥ ॥जलकु
म्भदानं॥प्रार्थना॥ॐनमोविश्वरूपायनमःसागरसंभव॥अपांपूर्णोद्धरा
स्मात्वंदुःखसंसारसागरात्॥उदककुम्भोमयादत्तंयथाशक्त्याजनार्दनं॥उ

दकुंभमथादत्तेयथा श्रीजनार्दनं॥उदककुंभप्रदानेनप्रीयतांमधुसू
दनं॥त्रयाणामपिलोकानामुदकंजीवनंस्मृतम्॥पवित्रममृतंयस्मात्तद्दानं
पुरापसुत्तमं॥नूतननवद्योगादिकृतजन्यसमफलप्राप्तिपूर्वककृतउत्तरशुभमा
सांशुकाद्यतकालिकाख्येनरा पुत्रहेममयवज्रदिव्यांगनासमाकीर्णसर्वर
त्नविभूषितसर्वकामफलप्रदशुभयानोपस्थितविष्णुसालोक्यशतयुगा
वच्छिन्ननित्यतृप्तित्वाक्षयब्रह्मलोकनिवाससदासौख्यप्राप्तिकामइयंज

अथपंचधेनूदानं॥

लकुम्भंवस्त्राद्दैवतं०॥ ॥इतिअन्नदानं॥ ॥ॐ॥नेपालसम्वत्९९४जे
ष्ठकृष्ण१३शो७नस्मिन्दिनेवकनिह्मगृहवासितश्रीवाग्पतिराजानन्दउ
पाध्यायेनलिखितमिदंपुस्तकम्॥ ॥ ॥अथमृतोद्देशेनजलकुम्भदा
नं॥अथादौद्वादशकुम्भान्जलपूरितान्वस्त्रनीरकापक्वान्नपूरितान्
॥संकल्पयदद्यात्॥अमुकोद्देशायमृतस्यप्रीतिपूर्वकाक्षयतृप्तिकामो
द्वादशसंख्याकान्जलकुम्भान्वस्त्राद्दैवतान्श्रीविष्णुप्रीतयेपक:

= सतालावर्द्धनीद्वियाकरकाकरकेत्रुपि =

न्नपूरितं वर्द्धनीकुम्भं अमुकगोत्राय ददामि ॥ ॥ एककुम्भं धर्म्मराजप्रीतये अ
मुकमुक्तिकामः ॥ एककुम्भं चित्रगुप्तप्रीतये अमुकसौख्यप्राप्त्यै ॥ ॥
ततः पंचदशकुम्भान् जलपूरितान् माषान्नपूर्णपात्रयुतान् षोडशश्राद्धा
द्भूः भूतान् षोडशब्राह्मणेभ्यो दद्यात् ॥ ॥ अथ पञ्चान्तरत्रिंशत्संख्या
कान् जलकुम्भान् ॥ अमुकोद्देशपञ्चान्तरत्रिंशत्संख्याकश्राद्धारस्थि
ताः स्थीनी पुष्टि पूर्वकवर्षिकमात्रस्य प्रतिदिनैकसंख्याकाक्षुत्पिपासावि

निह्न्निसपयन. थ्रिकामएतानिअत्कुम्भानिवहन्लदेवतानिसान्वपूर्ण
पात्राणिङजापनिदेवतानिध्यानोमगोत्रायेनि॥ ॥

